तन्निषेधपराणि "द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत वा । तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरहितद्यूतविषयतया च योज्यानि । किञ्च "द्यूतमेकमुखं कार्य्यन्तस्करज्ञानकारणात्" या० । यत्पूर्वोक्तं द्यूतन्तदेकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्य्यम् । राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः तस्करज्ञानकारणात् तस्करज्ञानरूपप्रयोजनम्पर्य्यालोच्य । प्रायशः चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्य्यम् । द्यूतधर्म्मं समाह्वयेऽतिदिशन्नाह । "एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये" या० । ग्लहे शतिकवृद्धेरित्यादिना योद्यूते धर्म्म उक्तः सएव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्त्ये समाह्वयसंज्ञके ज्ञातव्यः" ।

**आह्वयन** न० आह्वयं करोत्यनेन आह्वय+णिच् करणे ल्युट् । नामादेशसाधने शब्दभेदे । कर्त्तरि ल्यु । आह्वानकारके त्रि० "रामस्याह्वयना द्विजाः" रामा० ।

**आह्वयितव्य** त्रि० आह्वयं करोति आह्वय+णिच्–कर्म्मणि तव्य । आह्वानीये आकारणीये । "नेयमाह्वयितव्या ते शयने वार्षपर्वणी" भा० आ० ८२अ० ।

**आह्वर** त्रि० आ+ह्वृ–अच् । १कुटिले २उशीनरदेशोत्पन्ने च । तेन कन्याशब्दस्य षष्ठीसमासे क्लीवत्वम् । आह्वरकन्यम् । अत्रोत्तरपदस्याद्युदात्तत्वम् ।

**आह्वा** स्त्री आ+ह्वे–अङ् । १आह्वाने । करणे अङ् । २संज्ञायाम् नामनि "लेपश्च शस्यते सिक्थशताह्वगौरसर्षपैः" सुश्रु० ।

**आह्वान** न० आ+ह्वे–ल्युट् । आकारणे (डाका) "दूराह्वाने च गाने च रोदने च प्लुतोमतः" व्या० का० । करणे ल्युट् । २संज्ञायां नामनि नाम्ना वाऽऽकारणं हि क्रियते इति तस्य तथात्वम् । करणे ल्युट् । ३आह्वानसाधने राजकीयपत्रे । (तलवनामा) "यावदाह्वानदर्शनम्" भावे ल्युट् । व्यवहारे विवादनिर्णयार्थं ४राज्ञाऽऽकारणे (तलपकरा) तत्र वर्ज्यावर्ज्यप्रकारादि मिता० स्मृतिवाक्यात् दर्शितम् । यथा "विज्ञस्य कार्य्यं न्याय्यं चेदाह्वानार्थमतः परम् । मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत् । अकल्यबालस्थविरविषमस्थक्रियाकुलान् । मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः । न हीनपक्षां युवतिं कुलजातां प्रसूतिकाम् । सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः । तदधीनकुटुम्बिन्यः स्वैरिण्योगणिकाश्च याः । निष्कुला याश्च पतितास्तासामाह्वानमिष्यते । कालं देशञ्च विज्ञाय कार्य्याणाञ्च बलाबलम् । अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः । ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः । तानप्याह्वानयेद्राजा गुरुकार्य्येष्वकोपयन्निति" अत्र सर्व्वत्र आह्वानं–करोति णिचि आह्वानयेदिति सिद्धम् । "कृतोलुक् प्रकृतिवच्च कारकमिति वार्त्तिकं तु नेह प्रवर्त्तते बहुलग्रहणात् ।

**आह्वायक** त्रि० आ+ह्वे–ण्वुल् युच् । आह्वानकारके आका-

**आह्वारक** त्रि० आ+ह्वृ–ण्वुल् । कुटिले ।

रके । "आह्वायकेभ्यः श्रुतस्तनुदृष्टिः" भट्टिः णिनि आह्वायीत्यप्यत्र स्त्रियां ङीप् ।

**आह्वृति** स्त्री आ+ह्वृ–क्तिन् । १कौटिल्ये कर्त्तरि क्तिच् । २राजभेदे "रुक्मी चैवाह्वृतिश्चैव नीलोनामेदएव च" हरि० १४१अ० "रुक्मी चैवाह्वृतिश्चैव तस्यतुर्निश्चितौ रणे" हरिवं० १४२अ० "जरासन्धं समाश्रित्य तथैवाह्वृतिभीष्मकौ" हरि० १६०अ० ।

इति श्रीतारानाथतर्कवाचस्पतिसंकलिते वाचस्पत्ये
आकारादिशब्दार्थनिर्णयः ।

## इ

**इ** पु० अस्य विष्णोरपत्यम् अ+इञ् । १कामदेवे स हि रुक्मिण्यां विष्णोरंशात् कृष्णात् जातः तत्कथा यथा "रुक्मिण्यां वासुदेवाच्च लक्ष्म्यां कामोधृतव्रतः । शम्बरान्तकरो जज्ञे प्रद्युम्नः कामदर्शनः" हरि० १६३अ० । एवं व्युत्पत्तिमत्त्वेन कामदेवस्यैव इशब्दार्थता नाभिधानस्येति बहवः । कामदेवदैवत्याच्च अभिलाषे औपचारिक इत्यन्ये । नञर्थकस्य अ इस्येदम् अ+इञ् । २भेदे, ३रोषोक्तौ, ४निराकरणे, ५अनुकम्पायाम्, ६गदे, ७विस्मये, ८निन्दायाम्, ९सम्बोधने च अव्य० चादि । निपातैकाच्कत्वात् अस्य प्रगृह्यसंज्ञा तेन इ इन्द्र इत्यादौ न सन्धिः

**इ** गतौ भ्वादि० पर० सक० अनिट् । अयति ऐषीत् इयाय इयतुः इयुः इययिथ इयेथ । अयन् इतः इतिः अयनम् । आयः इत्वा । "उदयति स्म तदद्भुतमालिभिः" नैष० "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्" उद्भटः । "उदयति विततोर्द्ध्वरश्मिरज्जौ" माघः । अयञ्च धातुः